# || गणपति अथर्वशीर्ष स्तुति ||

Chalisamantras.com

|| शांति पाठ ||

ॐ भद्रं कर्णेभिः शृणुयाम देवाः,
भद्रं पश्येमाक्षभिर्यजत्राः,
स्थिरैरङ्गैस्तुष्टुवाँसस्तनूभिः,
व्यशेम देवहितं यदायूः ।

ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः,
स्वस्ति नः पूषा विश्ववेदाः,
स्वस्तिनस्ताक्ष्र्यो अरिष्टनेमिः,
स्वस्ति नो बृहस्पतिर्दधातु,
ॐ शान्तिः शान्तिः शान्तिः ।

|| गणपति अथर्वशीर्ष ||

ॐ नमस्ते गणपतये,
त्वमेव प्रत्यक्षं तत्त्वमसि,
त्वमेव केवलं कर्ताऽसि,
त्वमेव केवलं धर्ताऽसि,
त्वमेव केवलं हर्ताऽसि,
त्वमेव सर्वं खल्विदं ब्रह्मासि ।
त्वं साक्षादात्माऽसि नित्यम् ।

ऋतं वच्मि, सत्यं वच्मि,
अव त्वं माम्, अव वक्तारम्,
अव श्रोतारम्, अव दातारम्,
अव धातारम् अवानूचानमव शिष्यम् ।

अव पुरस्तात्, अव दक्षिणात्तात्,
अव पश्चात्तात्, अवोत्तरात्तात्,
अव चोर्ध्वात्तात्, अवाधरात्तात्,
सर्वतो मां पाहि पाहि समन्तात् ।

Chalisamantras.com

त्वं वाङ्मयस्त्वं चिन्मयः,
त्वमानन्दमयस्त्वं ब्रह्ममयः,
त्वं सच्चिदानन्दाऽद्वितीयोऽसि,
त्वं प्रत्यक्षं ब्रह्मासि ।
त्वं ज्ञानमयो विज्ञानमयोऽसि ।

सर्वं जगदिदं त्वत्तो जायते,
सर्वं जगदिदं त्वत्तस्तिष्ठति,
सर्वं जगदिदं त्वयि लयमेष्यति,
सर्वं जगदिदं त्वयि प्रत्येति,
त्वं भूमिरापोऽनलोऽनिलो नभः ।
त्वं चत्वारि वाक् पदानि ।

त्वं गुणत्रयातीतः, त्वं अवस्थात्रयातीतः,
त्वं देहत्रयातीतः, त्वं कालत्रयातीतः,
त्वं मूलाधारस्थितोऽसि नित्यम्,
त्वं शक्तित्रयात्मकः ।
त्वां योगिनो ध्यायन्ति नित्यम् ।

त्वं ब्रह्मा त्वं विष्णुस्त्वं,
रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं,
वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं,
ब्रह्म भूर्भुवस्सुवरोम् ।

गणादिं पूर्वमुच्चार्य वर्णादींस्तदनन्तरम्,
अनुस्वारः परतरः, अर्धेन्दुलसितम्,
तारेण ऋद्धम्,
एतत्तव मनुस्वरूपम् ।

गकारः पूर्वरूपम्, अकारो मध्यरूपम्,
अनुस्वारश्चान्त्यरूपम्, बिन्दुरुत्तररूपम्,
नादस्संधानम्,
सगंहिता संधिः ।

Chalisamantras.com

सैषा गणेशविद्या,
गणक ऋषिः,
निचृद्गायत्रीच्छन्दः,
गणपतिर्देवता ।
ॐ गं गणपतये नमः ।

एकदन्ताय विद्महे वक्रतुण्डाय धीमहि,
तन्नो दन्तिः प्रचोदयात् ।

एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम्,
रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम्,
रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम्,
रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैस्सुपूजितम्,
भक्तानुकम्पिनं देवं जगत्कारणमच्युतम्,
आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम्,
एवं ध्यायति यो नित्यं स योगी योगिनां वरः ।

नमो व्रातपतये, नमो गणपतये,
नमः प्रमथपतये,
नमस्तेऽस्तु लम्बोदरायैकदन्ताय,
विघ्ननाशिने शिवसुताय वरदमूर्तये नमः ।

Chalisamantras.com